International Journal of Sanskrit Research 2019; 5(6): 172-175

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 172-175
© 2019 IJSR
www.anantaajournal.com
Received: 28-09-2019
Accepted: 30-10-2019

**पूजाघोष**
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः, पुरी,
ओडिशा, भारत

Corresponding Author:
**पूजाघोषः**
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः, पुरी,
ओडिशा, भारत

# नाट्यशास्त्रोक्तानि शिक्षातत्त्वानि

**पूजाघोष**

**विषयसंक्षेपः**
सर्वाणि शास्त्राणि वाङ्मयानि वाङ्निष्ठानि च भवन्ति। वाणी भवति सर्वस्य कारणम्। समग्रः विश्वः वाण्या परिचाल्यते। नाट्यशास्त्रे वागाभिनयप्रसङ्गे वाणीसम्बन्धिताऽलोचना कृता। नाट्ये वाण्याः भाषायाः वा महती भूमिका वर्तते। यदा नाट्ये भाषाभावाभिनयरसादिनां सर्वेषां सामन्जस्यपुर्णा सम्प्रेषणीयता भवति तदैव नाट्यं सार्थकं जायते। अतः नाट्यशास्त्रे वाचिकाभिनयप्रसङ्गे संस्कृतभाषासम्पर्कितालोचनायां अस्याः भाषायाः शिक्षातत्त्वानि उच्चारणतत्त्वानि वा आचार्यभरतेन प्रदत्तानि। तानि नाट्यशास्त्रोक्तानि शिक्षातत्त्वानि एव आलोच्यन्ते अस्मिन् प्रवन्धे।

**मूलपत्रम्**
नाट्यशास्त्रं विश्वकलाकोषरूपेण राजते। कथितं यत् देवगणैः अनुरुन्धे सति भगवता ब्रह्मणा पञ्चमवेदरुपेण रचितमिदं नाट्यशास्त्रम्। नाट्यं नाम- तौर्यत्रिकं नृत्तगीतवाद्यं नाट्यमिदं त्रयम्।[1] इदं नाट्यकलाविषयकं शास्त्रमेव नाट्यशास्त्र-मित्युच्यते। आचार्यभरतेन रचिते इत्यस्मिन् नाट्यशास्त्रे न केवलं नाट्यकला अपि तु सर्वभारतीकलाः सर्वाणि शास्त्राणि च समाहितानि सन्ति।

> न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
> न तत्कर्म न योगोऽसौ नाट्येऽस्मिन् यन्न दृश्यते।। [2]

---

1.अमरकोशः १/७/१०

2.नाट्यशास्त्रम् १/११६

अत्र विविधेषु विषयेषु वागाभिनयप्रसङ्गे कानिचन शिक्षातत्त्वानि प्राप्यन्ते। शिक्षा नाम तच्छास्त्रं येन उच्चारणं शुद्धं सम्पद्यते। आचार्यसायणानुसारेण स्वरवर्णाद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा। नाट्यशास्त्रानुसारेण पाठ्यं, गीतं, वाद्यम्, अभिनयः, रसाः, अलङ्काराश्च इत्येषु सर्वेषु भाषा अङ्गाङ्गीरूपेण समाहिता भवति। भाषायाः यथायथोच्चारणेन एव एतेषां अर्थसिद्धिः जायते। वाणीसम्बन्धिते वाचिकाभिनयप्रसङ्गे भरतमुनिना भाषासम्बन्धालोचनं कृतम्। अत्रैव संस्कृतभाषायाः आलोचनाप्रसङ्गे अस्याः भाषायाः शिक्षातत्त्वानि आचार्येण उद्धृतानि। अत्र आदौ वर्णितः स्वराणां व्यञ्जनानाञ्च परिचयः।

> अकाराद्याः स्वरा ज्ञेया औकारान्ताश्चतुर्दश।
> इकारान्तानि कादीनि व्यञ्जनानि विदुर्बुधाः।।[3]

अर्थात् आदौ अ-कारः अन्ते च औ-कारः अस्ति येषां ते भवन्ति स्वराः। एते चतुर्दश भवन्ति। ते यथा-अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इति। पुनः क्-आदौ ह-कारश्च अन्ते स्थितानि येषां तानि भवन्ति व्यञ्जनवर्णानि। तानि यथा-क, ख, ग, घ,ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण, त, थ, द, ध, न, प, फ, ब, भ, म, य, र, ल, व, श, ष, स, ह इति त्रयोस्त्रिंशत्। एतेषु व्यञ्जनवर्णेषु वर्गानुसारेण आदौ स्थितौ द्वौ वर्णौ भवतः अघषौ तथा च वर्गेषु अन्तस्थिताः त्रयः वर्णाः सघोषाः।

> वर्गे वर्गे समाख्यातौ द्वौ वर्णौ प्रागवस्थितौ।
> अघोषा इति ये त्वन्ये सघोषाः संप्रकीर्तिता।।[4]

अस्मिन् विषये पुनरेव कथितं यत्-

> द्वौ द्वौ वर्णौ तु वर्गाद्यौ शषसाश्च त्रयोऽपरे।
> अघोषा घोषवन्तस्तु ततोऽन्ये परिकीर्तिताः।।[5]

इत्यनेन श ष स इति वर्णानामपि अघोषसंज्ञा भवति। अन्ये सर्वे वर्णाः अर्थात् सर्वे स्वरवर्णाः, अवशिष्टाः व्यञ्जनवर्णाश्च घोषसंज्ञकाः भवन्ति। इत्थं एते ये वर्णाः घोषाः अघोषाः वा भवन्ति ते कण्ठ्या ओष्ठ्याः दन्त्याः जिह्व्या अनुनासिक्याः उष्माणः तालव्यः विसर्जनीयाश्चेति रूपेणावबुद्ध्यत्ये।

> एते घोषाघोषाः कण्ठ्योष्ठ्या
> दन्त्यजिह्व्यानुनासिक्याः।
> ऊष्माणस्तालव्याः विसर्जनीयाश्च बोद्धव्याः।।[6]

एतदनन्तरमायाति वर्णानामुच्चारणस्थानम्। नाट्यशास्त्रे वर्णानां अष्टौ उच्चारणस्थानानि वर्णितानि। तानि यथा-उरः, कण्ठः, शिरः, जिह्वामूलः, दन्तः, नासिका, औष्ठः, तालुश्च।-

> अष्टौ स्थानानि वर्णानामुरः कण्ठः शिररस्तथा।
> जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च।।[7]

इत्थं क्रमशः स्वराणां व्यञ्जनानाञ्च उच्चारणस्थानं वर्णितम्। अ कु ह विसर्जनीयाः कण्ठ्याः। इ चु य शास्तालव्याः। ऋ त्तु र षा मूर्धन्याः। ऌ तु ल सा दन्त्याः। उ पूपध्मानीया ओष्ठ्याः। प फ इति पफाभ्यां प्राक् अर्धविसर्गसदृशः उपध्मानीयः। क ख इति कखाभ्यां प्राक् अर्धविसर्गसदृशो जिह्वामूलीयः। ए ऐ कण्ठ्यतालव्यौ। ओ औ कण्ठोष्ठ्यौ। वकारो दन्त्योष्ठ्यः। ङ ञ ण न मा अनुनासिकाः। विसर्जनीया औरस्य।[8] इति। अस्मिन् विषये पुनः स्पष्टीकृत्य विवृतं यत्-

---

[3].नाट्यशास्त्रम् १४/८

[4].नाट्यशास्त्रम् १४/९

[5].नाट्यशास्त्रम् १४/११

[6].नाट्यशास्त्रम् १४/१२

[7].नाट्यशास्त्रम् १४/१०

[8].नाट्यशास्त्रम् १४/११

कखगघङाः कण्ठस्थास्तालुस्थानास्तु चछजझञाः।
टठडढणा मूर्धन्यास्तथदधनाश्चैव दन्तस्थाः।।
पफबभमास्त्वोष्ठ्याः स्युः दन्त्या लृलसा अहौ च कण्ठस्थौ।
तालव्या इचुयशा स्युर्ऋदुरषा मूर्धास्थिताः ज्ञेयाः।।
लृलृ दन्त्यौ ओऔ कण्ठोष्ठ्यौ एऐकारो च कण्ठतालव्यौ।
कण्ठ्यो विसर्जनीयो जिह्वामूलमुद्भवः कखयोः।।[9]

वर्णनामुच्चारणप्रयत्नः द्विधा-आभ्यन्तरो बाह्यश्च। घोषः अघोषश्च भवतः बाह्यप्रयत्नौ। नाट्यशास्त्रे आदौ वर्णानां द्वयोः बाह्यप्रयत्नयोः उच्चारणस्थानाञ्च वर्णनान्तरं आभ्यन्तरप्रयत्नानां प्रसङ्गः प्राप्यते। अत्र प्राप्यते यत्-स्वराणामाभ्यन्तरप्रयत्नः भवति विवृतः। व्यञ्जनवर्णेषु क-वर्णतः म-वर्णपर्यन्तं वर्णाः भवन्ति स्पृष्टवर्णाः। परन्तु शषसवर्णाः पुनः विवृताः। अन्तःस्थवर्णानां अर्थात् य र ल व इत्येतेषां आभ्यन्तरप्रयत्नः वर्तते संवृतः। पुनः अनुनासिकवर्णानाम् अर्थात् ञमङणनानामुद्भवः नासिकास्ति। श ष स ह इत्येते वर्णाः ऊष्णवर्णाः कथ्यन्ते तथा च य र ल व इत्येते वर्णाः अन्तथाः इति।-

पफयोरोष्ठस्थानं भवेदुकारः स्वरो विवृतः।
स्पष्टाः कादया मान्ताः शषसहकारास्तथा विवृताः।।
अन्तस्थाः संवृतजाः ङणनमा नासिकोद्भवा ज्ञेयाः।
ऊष्मणश्च शषसहाः यरलववर्णास्तथैव चान्तःस्थाः।।[10]

पुनः शब्दप्रयोगे कचटतप इति वर्णाः भवन्ति स्वरिताः तथा च खछठथफवर्णाः सर्वदैव क्रम्याः। पाठ्यसंयोगे घझढधभनां कण्ठ्योरस्य भवन्ति। विसर्जनीयः जिह्वास्थानेस्थितः वर्णः इति ज्ञायते। एवं प्रकारेण नाट्यशास्त्रे आचार्यभरतेन व्यञ्जनवर्णाः संक्षेपेण वर्णिताः।

कचटतपा स्वरिताः स्युः खछठथफा स्युः सदा क्रम्याः।।
कण्ठ्योरस्यान् विद्यात् घझढधभान् पाठ्यसंयोगे तु।
वेद्यो विसर्जनीयो जिह्वास्थाने स्थितो वर्णः।।[11]

आचार्येण अन्ते शब्दप्रयोगक्षेत्रे स्वराणां व्यवहारः वर्णितः। तेनोक्तं चतुर्दशः स्वराः यत्र समरूपेण ज्ञायते तत्र ते सवर्णसंज्ञकाः। सवर्णः नाम त्युल्यास्य प्रयत्नं सवर्णम्[12] इति। येषां वर्णानां उच्चारणस्थानं आभ्यन्तरप्रयत्नश्च समानो भवति ते सवर्णसंज्ञकाः उच्यन्ते। यथा-अ, आ, एतौ सवर्णसंज्ञकौ यतोऽहि एतयोः उच्चारणस्थानं कण्ठ्यः आभ्यन्तरप्रयत्नः विवृतश्च। चतुर्दशस्वरवर्णेषु दश समानाः। एतेषु अर्थात् अ, आ, इ, ई, उ, ऊ,ऋ ॠ लृ लॄ इत्येतेषु पूर्वं पूर्वं वर्णाः ह्रस्वाः, अपरे तु दीर्घाः इति ज्ञेयाः।

यस्मिन् स्थाने स समो विज्ञेयो यः सवर्णसंज्ञोऽसौ।
य इमे स्वराश्चतुर्दश निर्दिष्टास्तत्र वै दश समानाः।।
पूर्वो ह्रस्वस्तेषां परश्च दीर्घोऽवगतव्यः।।[13]

नाट्यशास्त्रस्य स्वनामधन्यटीकाकारस्य अभिनवगुप्तपादस्य मतानुसारेण वागाभिनयप्रसङ्गे नाट्यशास्त्रे आगमः, नाम, आख्यातः, उपसर्गः, तद्धितः, निपातः, सन्धिः, विभक्तिः, उपग्रहः, नियुक्तः इत्यङ्गेन कवितावाचकशब्दनिष्ठव्यवहाराः उक्ताः। एतेषु अचां हलाञ्च स्थानकरणादिविषयकज्ञानं कवेः गाढशिथिलमसृणपरुषादिगुम्फविशेष-विभागाय

[9].नाट्यशास्त्रम् १४/१४,१५,१६
[10].नाट्यशास्त्रम् १४/१७,१८
[11].नाट्यशास्त्रम् १४/१६,२०
[12].पाणिनि अष्टाध्यायी १/१/१
[13].नाट्यशास्त्रम् १४/२२

उपदिष्टं, न तु एतेषां सम्यगुच्चारणोपदेशाय। पुनः वर्णानां सावर्ण्येन प्रत्युत्पन्नं प्रबन्धसौन्दर्यज्ञानार्थमेव एतानि तत्त्वानि आचार्येण वर्णितानि। घोषः भवति अनुप्रदानविशिष्टः प्रयत्नविशेषः। नासिका तथा एतस्य व्यवहारः यस्यान्ते समीपे वा भवति तस्य धर्मः अनुस्वारः ज्ञेयः। घोषवर्णानां वाहुल्याद् रचनायां गाढता आयाति। यथा-

अङ्ग दधन्तिबिडचन्दनमङ्गनानां
नैदाघवातसदनं न तु मन्मथस्य।।[14]

अत्र चकारः तकारश्च अघोषौ। एतदर्थमेव अर्थात् रचनायामास्वादनीयताम् आनेतुं आवेगानुभूतिप्रकाशयितुञ्च वर्णानां स्थानप्रयत्नादिविभागाः आचार्येण उपन्यस्ताः। अभिनवगुप्तपादस्य मतानुसारेण यद्यपि एतानि शिक्षातत्त्वानि सम्यगुच्चारणोपदेशाय आचार्येण नोपदिष्टानि, तथापि वागाभिनयप्रसङ्गे उल्लिखितैः एतैः शिक्षातत्त्वैः वर्णानां परिचयविषये उच्चारणस्थानप्रयत्नविषये च यत् सार्विकज्ञानमुपलभ्यते तत्तु अवश्यमेव स्वीकरणीयमेव। नाट्यशास्त्रस्य चतुर्दशाध्याये वागाभिनयप्रसङ्गे मूलतः एतानि शिक्षातत्त्वानि प्राप्यन्ते। अत्र न केवलं शिक्षातत्त्वानि अपि तु संस्कृतभाषाविषयकं सामग्रिकज्ञानं दीयते। सम्यक् भाषाज्ञानेन एव कवेः रचना यथायथव्यवहारं विचारञ्च प्राप्तुं शक्नोति। अतः वर्णानां शिक्षाज्ञानम् अत्यावश्यकम्। पुनः वाणी भवति नाट्यस्य शरीरम्। अङ्गिकाभिनयः आहार्याभिनयः सात्त्विकाभिनयश्च वाक्यार्थामेव व्यञ्जयन्ति। अतः अभिनेतृभिः अवश्यमेव वाणीविषयकसुस्पष्टज्ञानाहोरणे प्रयत्नः कर्तव्यः।

वाचि यत्न स्तुकर्तव्यो नाट्यस्येयं तनूः स्मृता।
अङ्गनेपथ्यतत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि।।[15]

[14].नाट्यशास्त्रम्-(द्वितीयभाग)अभिनवभारती टीका-पृष्ठा-११६९

[15].नाट्यशास्त्रम्-१४/२

## सन्दर्भ


1. भरतमुनि नाट्यशास्त्रम् सम्पा.श्रीमधुसूदनशास्त्री, प्रथमसंस्करणम्, प्रथमखण्ड, वाराणसी, काशीहिन्दुविश्वविद्यालय, 1971।
2. भरतमुनि नाट्यशास्त्रम् सम्पा.श्रीमधुसूदनशास्त्री, प्रथमसंस्करणम्, द्वितीयखण्ड, वाराणसी, काशीहिन्दुविश्वविद्यालयः, 1975।
3. भरतमुनि नाट्यशास्त्रम् सम्पा. पं. श्रीजगन्नाथशास्त्रीतैलङ्गः, प्रथमसंस्करणम्, वाराणसी, भारतीयविद्याप्रकाशन, 2000।
4. भारतनाट्यशास्त्र सम्पा.सुरेशचन्द्रवन्द्योपाध्यायः, प्रथमसंस्करणम्, कोलकाता, नवपत्रप्रकाशन, 1956।
5. नाट्यशास्त्र का इतिहास लेखक. डॉ. पारसनाथद्विवेदी, प्रथमसंस्करणम्, वाराणसी, चौखम्बा सुरभारती प्रकाशन, 2012।
6. वैयाकरणसिद्धान्तकौमुदी व्याख्या. श्री गोपालदत्तपाण्डेयः, प्रथमसंस्करणम्, वाराणसी, चौखम्बा सुरभारती प्रकाशनी, 2007।
7. पाणिनीयशिक्षा अनु.मनमोहनघोषः, प्रथमसंस्करणम्, कोलकाता, कोलकाता विश्वविद्यालयः, 1938।
8. अमरकोषः सम्पा.श्री.पं.हरगोविन्दशास्त्रि, तृतीयसंस्करण, वाराणसी, चौखम्बा संस्कृत संस्थान, 1997।